



**19**

309sk19

# क्रोधोऽनर्थकारकः

मानवजीवने सर्वदा सर्वम् अनुकूलमेव न घटते। कदाचित् कामनाः प्रतिहताः भवन्ति, कदाचित् कश्चित् कस्यचित् उपहासं करोति। एतादृशीषु प्रतिकूलपरिस्थितिषु केचन जनाः सर्वं शान्तभावेन सहन्ते। परम् अपरे केचित् क्रुद्धाः भूत्वा आत्मनः परेषां च अपकारं कुर्वन्ति। क्रोधस्य परिणामाः भयङ्कराः एव भवन्ति। क्रोधावेशे विवेकः विनश्यति। एकदा अतिक्रुद्धेन दुर्वाससा देवी सरस्वती अभिशप्ता। अत्र वयम् इमामेव रोचककथां पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- क्रोधस्य दुष्परिणामं वर्णयितुं समर्थः भविष्यति;
- धरणितले सरस्वत्याः अवतरणस्य कथां लेखितुं शक्तः भविष्यति;
- दुर्वासामुनेः चरित्रचित्रणं कर्तुं सक्षमः भविष्यति;
- सकारान्तपुल्लिङ्गशब्दानां रुपाणि लेखितुं शक्ष्यति;
- विसर्गस्थाने रत्वं सत्वम् इति करिष्यति;
- दृश् धातोः रूपाणां प्रयोगं करिष्यति।



## क्रियाकलापः

चित्राणि दृष्ट्वा प्रश्नानि उत्तरत। उत्तराणि मञ्जूषायां दत्तानि।



19.1

(क) माता बालकाय किं ददाति?

(ख) बालकाय तु किं रोचते?

(ग) सः क्रोधेन उन्मत्तः भूत्वा किं करोति?

(घ) मृत्तिकास्थालिका कुत्र पतति?

(ङ) मृत्तिकास्थालिकायाः कः परिणामः भवति?

| भूमौ, भोजनम्, स्थालिकां क्षिपति, स्थालिका भग्ना भवति, मिष्ठान्नं |
|---|

## 19.1 मूलपाठः

### क्रोधोऽनर्थकारकः

अधुना वंय मूलापाठं ध्यानेन पठामः।

पुरा भगवान् परमेष्ठी कमलासने समुपाविष्टः देवैः परिवृतः विद्यागोष्ठीः समाचरन् आसीत्। केचित् स्तुतिचतुराः ऋचः समुदचारयन्। केचित यजूंष्यपठन्। केचित् सामानि अगायन्। तत्र प्रकृत्या अतिरोषणः महातपा मुनेरत्रेस्तनयः दुर्वासा द्वितीयेन मन्दपालनाम्ना मुनिना सह कलहायमानः साम गायन् क्रोधान्धः भूत्वा विस्वरमकरोत्। सर्वेषु च तेषु शापभयात् मौनेषु

**शब्दार्थाः**

परमेष्ठी = ब्रह्मा
परिवृतः = घिरे हुए
विद्यागोष्ठीः = विद्यागोष्ठी
समाचरन् = आयोजित करते हुए
ऋचः = ऋचाओं का
समुदचारयन् = उच्चारण कर रहे थे
अतिरोषणः = अतिक्रोधी
मुनेः अत्रेः तनयः = अत्रि मुनि का पुत्र
विस्वरम् = बेसुरा

मुनिषु, पितामहम् उपवीजयन्ती सरस्वती तच्छ्रुत्वा हसितुं प्रारभत।

तां तथा हसन्तीं स मुनिः 'आः पापकारिणि! दुर्विदग्धे! माम् उपहससि' 'इत्युक्त्वा जटाकलापस्य रोचिषा सिञ्चन्निव रोषदहनद्रवेण दशदिशः भृकुटिमाबध्नन् अतिलोहितेन चक्षुषा कोपकम्पतरलिताङ्गुलिना करेण अक्षमालाम् आक्षिप्य कामण्डलवेन वारिणा समुपस्पृश्य शापजलं जग्राह।

उपवीजयन्ती = पंखा झलती हुई
दुर्विदग्धे = दुरभिमानिनी
जटाकलापस्य = जटासमूह से
रोचिषा = तेज से
रोषदहनद्रवेण = क्रोधाग्नि के द्रव से
भुकुटिम् आबध्नन् = भौंहें चढ़ाते हुए
अतिलोहितेन = अत्यधिक लाल
कोप = क्रोध से उत्पन्न कंपकंपा के कारण चंचल अंगुलियों वाले
करेण = हाथ से
कामण्डलवेन = कमण्डलु के
समुपस्पृश्य = आचमन करके



19.2

अत्रान्तरे स्वयम्भुवस्समीपे समुपविष्टा देवी सावित्री अवदत्, ''आः दुरात्मन् क्रोधोपहत, कथम् आत्मस्खलितम् अगणय्य सुरासुरमुनिमनुजवृन्दवन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् अभिलषसि'', 'ततो मर्षय भगवन्! अभूमिरेषा शापस्य' इत्यनुनाथ्यमानोऽपि विबुधैः 'उपाध्याय! स्खलितमेकं क्षमस्व' इति बद्धांजलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः पुत्र! मा कृथास्तपसः प्रत्यूहम् इति निवार्यमाणोऽप्यत्रिणा रोषवेशविवशो दुर्वासाः 'दुर्विनीते! व्यपनयामि ते विद्याजनितामुन्नतिम् इमाम्, अधस्ताद् गच्छ मर्त्यलोकम्' इत्युक्त्वा तप्छापोदकं विससर्ज। प्रतिशापदानाय उद्यतां सावित्रीं 'सखि! संहररोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः' इति अभिदधाना सरस्वती एव तां न्यवारयत्।

अत्रान्तरे = इसी बीच
स्वयम्भुवः = ब्रह्मा के
अगणय्य = न समझते हुए
मर्षय = क्षमा करो
अभूमिः = योग्य नहीं है
अनु0 = अनुनय किए जाने पर भी
विबुधैः = देवों के द्वारा
स्खलितम् = अपराध को
प्रसाद्यमानः = मनाए जाते हुए भी
प्रत्यूहम् = विघ्न
निवार्यमाणः = रोका जाता हुआ
अत्रिणा = अत्रि के द्वारा
व्यपनयामि = दूर करता हूँ
विद्याजनिताम् = विद्या जनित उन्नति को
विससर्ज = छोड़ दिया
अधस्ताद् = नीचे
प्रतिश0 = बदले में शाप देने का उद्यत
संहर = रोको
असंस्कृ0 = असंस्कृत मति वाले भी मुनि
अभिदधाना = कहती हुई
न्यवारयत् = रोका

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा शापकलकलं निवार्य पितामहः सुधीरम् उवाच, 'ब्रह्मन्! न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिः! न ते आत्मदोषं पश्यति। अतिरोषणश्चक्षुष्मानन्धः एव जनः। न हि कोपकलुषिता विमृशति मतिः कर्तव्यम् अकर्तव्यम् वा। रोषदोषनिषधे स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसां सरस्वतीम्।' इत्युक्त्वा पुनराह– 'वत्से सरस्वति! विषादं मा गाः। एषा त्वामनुयास्यति सावित्री। विनोदयिष्यति चास्मद्विरहदुःखिताम्। आत्मजमुखकमलावलोकनावधिश्च ते शापं भविष्यति।

सुधीरम् = धैर्यपूर्वक
दक्षा = चतुर
अतिरोषणः = अति क्रोधी
चक्षुष्मान् = आंखों वाला
कोपकलुषिता = क्रोध से कलुषित
मति = बुद्धि
निग्राह्ये = नियन्त्रित करने के स्थान पर
अनागसां = निरपराध
पुनः आह = फिर कहा
मा गाः = मत प्राप्त होवो
अनुयास्यसि = पीछे पीछे जाएगी।

## 19.2 बोधप्रश्नाः

1. पाठं सम्यक् पठित्वा 'अ' स्तम्भस्य वाक्यांशैः सह 'ब' स्तम्भस्य वाक्यांशानां मेलनं कुरुत

| 'अ' | 'ब' |
|---|---|
| (क) केचित् स्तुतिचतुराः | (i) अगायन्। |
| (ख) ततो मर्षय भगवन्! | (ii) ऋचः समुदचारयन्। |
| (ग) केचित् सामानि | (iii) विषादं मा गमय। |
| (घ) वत्से सरस्वति! | (iv) विससर्ज। |
| (ङ) इत्युक्त्वा तच्छापोदकं | (v) सर्वतपसाम्। |
| (च) क्षमा हि मूलं | (vi) अभूमिरेषा शापस्य |

2. पाठात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत

(क) पितामहम् उपवीजयन्ती सरस्वती तच्छ्रुत्वा हसितुं ..................................।

(ख) आत्मजमुखकमलावलोकनावधिश्च ते शापं ..................................।

(ग) कुपिता बुद्धिः न ते आत्मदोषं ..................................।

(घ) वत्से सरस्वति! विषादं मा ..................................।

(ङ) मुनिः कामण्डलवेन वारिणा समुपस्पृश्य शापजलं ..................................।

3. प्रश्नान् उत्तरत (एकपदेन)
   (क) भगवान् परमेष्ठी कुत्र समुपविष्टः?
   (ख) क्रोधान्धः भूत्वा दुर्वासाः किम् अकरोत्?
   (ग) स्वयंभुवः समीपे का समुपविष्टा आसीत्?
   (घ) क्षमा केषां मूलम्?
   (ङ) कीदृशी बुद्धिः कर्त्तव्यम् अकर्तव्यं वा न विमृशति?

---

## 19.3 अधुना अवगच्छामः

### प्रथमः अंशः

**पुरा भगवान् ........................................................ शापजलं जग्राह।**

अधुना वयं पाठस्य प्रथमांशं सम्यक् अवबोधामः।

**व्याख्या**

अत्र दुर्वाससः क्रोधसम्बद्धा एका कथा समुदाहृता। पुरा देवैः परिवृतः परमेष्ठी (परमे पदे तिष्ठति इति) ब्रह्मा विद्यागोष्ठीः समाचरन् कमलस्य आसने उपविष्टः आसीत्। ऋचां, यजुषां साम्नां च उच्चारणं भवति स्म। गोष्ठ्यां परस्परं विद्याविसंवादेकृते विवादे अतिक्रोधिनः दुर्वाससः द्वितीयेन मुनिना सह कलहः सञ्जातः। कलहायमानः सः साम गायन् विस्वरम् अकरोत्। विस्वरं श्रुत्वा सरस्वती हसितवती। दुर्वासाः तत्क्षणमेव शापं दातुम् उद्यतः अभवत्।

एतां कथां सम्यक् अवबोद्धुम् अधोलिखितानां परिचयः अस्माकं सहायकः भविष्यति–

विद्यागोष्ठीः– ब्रह्मसृष्ट्यादिविविधविषयाणां विवेचनार्थम् आयोज्यमानाः गोष्ठयः।

ऋचः– ऋग्वेदस्य मन्त्राः।

यजूंषि – यजुर्वेदस्य मन्त्राः।

सामानि – सामवेदस्य मन्त्राः।

दुर्वासाः– दुर्वासाः एकः अतिक्रोधी ऋषिः इति भवद्भिः अवश्यमेव श्रुतं भवेत्। सः अत्रेः अनसूयायाश्च आत्मजः (पुत्रः) आसीत्। तस्य प्रसादनम् अतीव दुष्करमासीत्। तेन अनेके जनाः अभिशप्ताः। कालिदासस्य अभिज्ञानशाकुन्तलस्य नाटकस्य नायिका शकुन्तला अपि तेन शप्ता आसीत्।

विस्वरम्– स्वरदोषम्। वेदमन्त्राणां गाने त्रयः स्वराः भवन्ति उदात्तः अनुदात्तः स्वरितश्च। अर्थात् यः स्वरः उच्चैः उच्चार्यते स 'उदात्तः' भवति। यः स्वरः नीचैः = शनैः उच्चार्यते स अनुदात्तः भवति। यः स्वरः मध्यमरूपेण उच्चार्यते स स्वरितः कथ्यते। यदि एकस्य स्वरस्य स्थाने अन्यः स्वरः प्रयुज्यते तदा विस्वरः जायते।

**दशदिशः**

1. पूर्वा, 2. आग्नेयी, 3. दक्षिणा, 4. नैर्ऋती, 5, पश्चिमा, 6. वायवी, 7. उत्तरा, 8. ऐशानी, 9. ऊर्ध्वम्, 10. अधः।




## व्याकरणबिन्दवः

**पदपरिचयः**

| | |
|---|---|
| यजूंषि | 'यजुस्' शब्दः, नपुंकसकलिङ्गम्, द्वितीयाविभक्तिः, बहुवचनम्। |
| प्रकृत्या | 'प्रकृति' शब्दः, तृतीयाविभक्तिः, एकवचनम्। |
| अत्रेः | 'अत्रि' शब्दः, षष्ठीविभक्तिः, एकवचनम्। |
| दिशः | 'दिक्' शब्दः, प्र. द्वितीयाविभक्तिः, बहुवचनम्। |
| चक्षुषा | 'चक्षुष्' शब्दः, नपुसकलिङ्गम्, तृतीयाविभक्तिः, एकवचनम्। |
| वारिणा | 'वारि' शब्दः, नपुसकलिङ्गम्, तृतीयाविभक्तिः, एकवचनम्। |
| उपहससि | उप + हस् लट् म.पु. एकवचनम्। |
| जग्राह | √ग्रह् लिट् प्र.पु. एकवचनम् |

**क्तप्रत्ययान्तशब्दाः**

| | |
|---|---|
| समुपविष्टः | सम् + उप + √विश् + क्त पु. एकवचनम् |
| परिवृतः | परि + √वृ + क्त + पु. एकवचनम् |

**क्त्वाप्रत्ययान्तशब्दाः**

| | |
|---|---|
| भूत्वा | √भू + क्त्वा |
| उक्त्वा | √वच् + क्त्वा |
| श्रुत्वा | √श्रु + क्त्वा |

**ल्यप्प्रत्ययान्तशब्दौ**

| | |
|---|---|
| आक्षिप्य | आ + √क्षिप् + ल्यप् |
| समुपस्पृश्य | सम् + उप + √स्पृश् + ल्यप् |

**शतृशानच्प्रत्यान्तशब्दाः**

| | |
|---|---|
| कलहायमानः | √कलह + णिच् + शानच् पु. प्र.वि. एकवचनम् |
| उपबीजयन्ती | उप + √बीज् + शतृ + स्त्रीलिंग प्र.पु. एकवचनम् |
| हसन्तीम् | √हस् + शतृ + स्त्रीलिंगम्, द्वितीया वि. एकवचनम् |

**सन्धिच्छेदाः:**

| | | |
|---|---|---|
| मुनेरत्रेस्तनयः | = मुनिः + अत्रेः + तनयः | (विसर्गःसन्धिः) |
| क्रोधान्धः | = क्रोध + अन्धः | (दीर्घसन्धिः) |
| तच्छ्रुत्वा | = तत् + श्रुत्वा | (व्यञ्जनसन्धिः) |

**प्रथमांशसारः**

पुरा भगवान् ब्रह्मा देवैः परिवृतः विद्यागोष्ठीः भावयन् उपाविशत। गोष्ठ्यां वेदमन्त्राणां पाठः अभवत्। विद्यायाः विभिन्नेषु विषयेषु वादविवादः प्राचलत्। एकस्मिन् विषये क्रोधयुक्तः दुर्वासाः ऋषिः केन अपि मुनिना सह कलहायमानः साम गायने स्वरभङ्गम् अकरोत्। तत् श्रुत्वा भगवती सरस्वती अहसत्। अपमानम् अनुभूय दुर्वासाः सरस्वतीं शप्तुं जलं हस्ते अगृहणात्।

प्राचीन समय में ब्रह्मा ने दवेताओं के साथ शाश्वत ब्रह्म के विषय में चर्चा करने के लिए गोष्ठी का आयोजन किया। गोष्ठी में वेदमन्त्रों का पाठ हुआ। वहाँ उन लोगों के बीच आपस में विद्याविषयक बहस छिड़ गई। एक विषय पर क्रोधी दुर्वासा का किसी दूसरे मुनि के साथ झगड़ा हो गया और उनके द्वारा सामगान करते हुए क्रोध के कारण स्वरभङ्ग हो गया। शाप के डर से सब मुनि तो चुप रहे किन्तु भगवती सरस्वती से यह स्वरहीन पाठ सहन नहीं हुआ और वे हँस पड़ी। स्वयं को अपमानित मान कर दुर्वासा ने सरस्वती को शाप देने के लिए हाथ में जल ले लिया।

## पाठगतप्रश्नाः 19.1

1. एकपदेन उत्तरत
   (क) भगवान् परमेष्ठी कैः परिवृतः आसीत्?
   (ख) दुर्वासाः कस्य तनयः आसीत्?
   (ग) मन्दपालनाम्ना मुनिना सह कस्य कलहः जातः?

(घ) साम गायन् दुर्वासाः किम् अकरोत्?

(ङ) विस्वरं श्रुत्वा का अहसत्?

(च) सरस्वतीं शप्तुं दुर्वासाः किम् जग्राह?

2. मञ्जूषायाः उपयुक्तं शतृप्रत्यान्तं पदं चित्वा रिक्तस्थानपूर्तिं कुरुत–

| उपवीजयन्ती, हसन्तीं, आबध्नन्, समाचरन्, धावन्ती, शिक्षयन्ती |
|---|

(क) तां ......................... दृष्ट्वा मुनिः तस्यै अक्रुध्यत्।

(ख) पितामहम् ......................... भगवती सरस्वती जहास।

(ग) भुकुटिम् ......................... दुर्वासा शापजलं जग्राह।

(घ) ...................... बालिका हसति।

(ङ) परमेष्ठी विद्यागोष्ठीः ............... आसीत्।

(च) ............................. अध्यापिका चित्रं दर्शयति।

3. रिक्तस्थानेषु उचितं कर्मपदं लिखत–

(क) केचित् स्ततिचतुराः ............................ समुदचारयन्।

(ख) केचित् ....................... अगायन्।

(ग) दुर्वासाः साम गायन् ............... अकरोत्।

(घ) कामण्डलवेन वारिणा समुपस्पृश्य दुर्वासा ..................... जग्राह।

(ङ) केचित् ............................ अपठन्।

(च) ..................................... उपवीजयन्ती सरस्वती हसितुं प्रारभत्।

---

## द्वितीयः अंशः

**अत्रान्तरे ........................................................... न्यवारयत्।**

सम्प्रति वयं द्वितीयम् अशं सम्यक् अवगच्छामः। वयं सर्वे जानीमः यत् क्रोधावेशे जनः कर्त्तव्यम् अकर्तव्यं विचारयितुम् अक्षमः। किम् स्मरन्ति भवन्तः यत् कदाचित् क्रोधावेशे भवद्भिः अपि किञ्चित् अनिष्टं कृतम्। यदि स्मृतिपथम् आयाति काचित् घटना तर्हि पञ्चवाक्येषु लिखन्तु।

**व्याख्या**

वयं प्रायः पश्यामः यत् क्रोधोन्मत्ताः जनाः अनर्थं कुर्वन्ति। अतिक्रोधी दुर्वासाः अपि क्रोधान्धः भूत्वा देव्या सावित्र्या, देवैः, शिष्यैः, स्वपित्रा च बहुशः निवारितः अपि सरस्वतीम् अभिशप्तवान्। प्रतिक्रियारूपेण प्रतिशापं प्रदातुम् उद्यता सावित्री सरस्वत्या निवारिता। तस्याः मते मुनयः सर्वथा माननीयाः।





बाल्यकाले भवन्तः अनेककथाः श्रुतवन्तः यासु शापस्य वरस्य वा वर्णनम् आसीत्। प्राचीनकाले प्रसन्नाः देवाः ऋषयः च वरदानम् रुष्टाश्च शापं प्रदातुं समर्थाः आसन्। यत् किञ्चित् अपि ऋषिमुखात् विनिःसृतं तत् अवश्यमेव घटितम्। उक्तम् च उत्तररामचरिते– ''ऋषीणां पुनराद्यानां वाचम् अर्थोऽनुधावति।'' अधत्वेऽपि ये जनाः सततं सत्यम् आराधयन्ति ते एतादृशीं शक्तिं प्राप्नुवन्ति।

वयं पश्यामः यत् जनाः भिन्नप्रकृतयः भिन्न स्वभावाः भवन्ति। अस्यामेव कथायाम् एकतः क्रोधपरायणः दुर्वासाः अपरतः क्षमारूपिणी शान्तस्वभावा सरस्वती या दुर्वाससा अभिशप्ता अपि देवीं सावित्रीं प्रतिशापदानात् न्यवारयत्। सरस्वती विद्यायाः देवी वर्तते। अतएव सा विनम्रस्वभावा विद्यते। यतः 'विद्या ददाति विनयम्।''

## व्याकरणबिन्दवः

### पदपरिचयः

| | |
|---|---|
| विबुधैः | 'विबुध' शब्दः, तृतीयाविभक्तिः, बहुवचनम् |
| अत्रिणा | 'अत्रि' शब्दः, तृतीयाविभक्तिः, एकवचनम् |
| दुर्विनीते! | 'दुर्विनीता' शब्दः, सम्बोधन–एकवचनम् |
| अभिलषसि | अभि + लष् + लट् म.पु. एकवचनम् |
| क्षमस्व | √क्षम् + लोट् म.पु. एकवचनम् |
| कृथाः | √कृ + विधिलिङ् म.पु. एकवचनम् आत्मनेपदी |
| व्यपनयामि | वि + √अप + नी + लट् उ.पु. एकवचनम् |
| गच्छ | √गम् लोट् म.पु. एकवचनम् |
| विससर्ज | वि + √सृज् + लिट् |
| संहर | सम् + √हृ + लोट् म.पु. एकवचनम् |

### तुमुन्प्रत्ययान्तशब्दः

| | |
|---|---|
| शप्तुम् | √शप् + तुमुन् |

### शानच्प्रत्ययान्तशब्दाः

| | |
|---|---|
| अनुनाथ्यमानः | अनु + नाथ् + णिच् + शानच् पु. प्र.वि. एकवचनम् |
| प्रसाद्यमानः | प्र + सद् + णिच् + शानच् पु. प्र.वि. एकवचनम् |
| निवार्यमाणः | नि + वृ + णिच् + शानच् पु. प्र.वि. एकवचनम् |

### सन्धिच्छेदाः

| | | |
|---|---|---|
| स्वयम्भुवस्समीपे | = स्वयंभुवः + समीपे – | विसर्गसन्धिः (सत्वम्) |
| क्रोधोपहतः | = क्रोध + उपहतः – | गुणसन्धिः |
| अभूमिरेषा | = अभूमिः + एषा – | विसर्गसन्धिः (रत्वम्) |

| | | |
|---|---|---|
| इत्यनुनाथ्यमानोऽपि | = इति + अनुनाथ्यमानः + अपि – | यण्सन्धिः विसर्गसन्धिश्च। |
| प्रसाद्यमानोऽपि | = प्रसाद्यमानः + अपि – | विसर्गसन्धिः (उत्वम्) |
| कृथास्तपसः | = कृथाः + तपसः – | विसर्गसन्धिः (सत्वम्) |
| निवार्यमाणोऽप्यत्रिणा | = निवार्यमाणः + अपि + अत्रिणा– | विसर्गसन्धिः, पूर्वरूपसन्धिः, यण्सन्धिश्च। |
| असंस्कृतमतयोऽपि | = असंस्कृतमतयः + अपि – | विसर्गसन्धिः (उत्वम्) |
| इत्युक्त्वा | = इति + उक्त्वा – | यण् सन्धिः |
| तच्छापोदकम् | = तत् + शाप + उदकम् – | व्यञ्जनसन्धिः,गुणसन्धिश्च। |
| न्यवारयत् | = नि + अवारयत् – | यण्सन्धिः |

### द्वितीयांशसारः

अस्मिन् अवसरे देवी सावित्री अपि ब्रह्मणः समीपे समुपविष्टा आसीत्। सा दुर्वाससम् अवदत् यत् सः क्रोधी, आत्मापराधम् अगण्य्य सर्वैः वन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् इच्छति। देवैः शिष्यैः च प्रसाद्यमानोऽपि पित्रा अत्रिणा च निवार्यमाणः अपि सः सरस्वत्याः विद्याजनितगर्वं दूरीकर्तुं "गच्छ अधः मर्त्यलोकम्" इति कथयित्वा शापजलं विसर्जितवान्। प्रतिशापं दातुम् उद्यताम् सावित्रीं सरस्वती न्यवारयत्।

इस अवसर पर सावित्री भी ब्रह्मा के समीप बैठी थी। उन्होंने दुर्वासा से कहा– "अरे दुरात्मन्, क्रोधी अपने अपराध को न मानने वाला तू सबके द्वारा वन्दनीया, त्रिभुवन की माता सरस्वती को शाप देना चाहता है।" देवताओं और शिष्यों द्वारा प्रार्थना किए जाने पर भी तथा पिता अत्रि द्वारा सरस्वती को शाप देने के लिए मना किये जाने पर भी वह नहीं माना और उसने सरस्वती के विद्याजनित वर्ग को तोड़ने के लिए शाप का जल छिड़क कर सरस्वती को नीचे मर्त्यलोक में जाने का शाप दे दिया। दुर्वासा को प्रतिशाप देने के लिए तैयार सावित्री को सरस्वती ने ऐसा करने से रोक दिया।

## पाठगतप्रश्नाः 19.2

1. अधोलिखितवाक्यानि पठित्वा रेखांकितपदम् आश्रित्य प्रश्ननिर्माणं क्रियताम्
   (क) देवी सावित्री स्वयम्भुवः समीपे समुपविष्टा आसीत्।
   (ख) सा दुर्वाससम् अपृच्छत्, 'किमर्थं त्वं सरस्वतीं शप्तुम् इच्छसि?
   (ग) दुर्वासाः देवैः शिष्यैः च प्रार्थितः।
   (घ) सः अत्रिणा निवारितः।
   (ङ) अधस्तादगच्छ मर्त्यलोकम् इत्युक्त्वा तच्छापोदकं विससर्ज।
   (च) सरस्वती सुरैः असुरैः मुनिभिः नरैः च वन्दनीया।





2. सन्धिच्छेदे सन्धियुक्ते पदे वा रिक्तस्थानानि पूरयत–

(क) क्रोध + उपहतः = ....................................

(ख) अभूमिः + ............................. = अभूमिरेषा

(ग) .......................... + अनुनाथ्यमानः + .......................... = इत्यनुनाथ्यमानोऽपि

(घ) ............................. + अंजलिपुटैः = बद्धांजलिपुटैः

(ङ) इति + .............................. = इत्युक्त्वा

3. अधः शानच्प्रत्ययान्तपदानि सन्ति। तेषां प्रकृतिः निर्देशनीया

| पदम् | प्रकृतिः |
|---|---|
| (क) कलहायमानः | ...................... |
| (ख) अनुनाथ्यमानः | ...................... |
| (ग) प्रसाद्यमानः | ...................... |
| (घ) निवार्यमाणः | ...................... |
| (ङ) वर्तमानः | ...................... |
| (घ) कम्पमानः | ...................... |

## तृतीयः अंशः

**अथ तां तथा ................................................... शापं भविष्यति।**

सम्प्रति वयं तृतीयम् अंशं पुनः पठामः सम्यक् अवगच्छामः च।

**व्याख्या**

निरपराधां सरस्वतीं शप्तां दृष्ट्वा ब्रह्मा सधैर्यं दुर्वाससं न्यवेदयत्–

**(क) ''न खलु साधुसेवितोऽयं पन्थाः येनासि त्वं प्रवृत्तः।''**

अयं मार्गः तु क्रोधवशात् शापदानेन अन्येषाम् अनिष्टकरणस्य मार्गः, सज्जानानां मार्गः न अस्ति। यदि कश्चित् प्रतिकूलम् आचरति तर्हि द्वौ विकल्पौ वर्तेते– क्रोधमार्गः क्षमामार्गश्च। क्रोधमार्गम् उपयुक्तं मन्यमानाः कथयन्ति यत् क्रोधरहितस्य जनस्य शत्रुषु भयं न भवति। क्रोधशून्यान् जनान् शठाः तथैव नाशयन्ति यथा कवचरहितान् अंगान् तीक्ष्णाः बाणाः।

परं सतां तु क्षमामार्गः एव। अस्माभिः अपि क्षमामार्गः एव अनुसरणीयः। यतो हि– ''महाजनो येन गताः स पन्थाः।''

ब्रह्मा दुर्वाससम् उपादिशत् यत् शापदानात् वरं क्षमादानं भवति, यतः ''क्षमा हि मूलं सर्वतपसाम्'' क्षमातुल्यं तपः न विद्यते। क्षमाशीलाय जनाय दुर्जनः अपि किमपि अनिष्टं कर्तुं न प्रभवति। कथितमपि ''क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति?'' क्षमा एकं

वशीकरणमन्त्रं येन सर्वं साधयितुं शक्यते। सुष्ठु उक्तं महाभारते ''क्षमावशीकृतिर्लोके क्षमया किं न साध्यते।''

**(ख) परदोषदर्शनक्षमा दृष्टिरिव कुपिता बुद्धिः न ते आत्मदोषं पश्यति''**

ब्रह्मा दुर्वाससम् अकथयत् यत् परदोषदर्शनपरायणा बुद्धिरिव ते क्रोधयुक्ता बुद्धिः आत्मदोषदर्शने असमर्था अस्ति। वयं प्रायः पश्यामः यत् केचन जनाः निरन्तरं परदोषदर्शने निरताः भवन्ति। ते परावगुणपरमाणून् अपि पर्वतीकृत्य पश्यन्ति अर्थात् परेषां स्वल्पम् अपि दोषं महान्तं दोषमिव पश्यन्ति। परं ते महत्तरान् अपि आत्मदोषान् न पश्यन्ति। क्रोधयुक्ता बुद्धिः स्वदोषदर्शने न प्रवर्तते। क्रोधीजनः नेत्रवान् अपि नेत्रहीनः इव भवति। सः कर्तव्यम् अकर्तव्यं वा निश्चेतुं न शक्नोति। क्रोधस्य कारणात् एव दुर्वासाः निर्दोषायै सरस्वत्यै शापं दत्तवान्। अतः सुस्पष्टं यत् 'क्रोधः महान् अनर्थकरः।'

प्रायः वयं पश्यामः यत् किशोराः अत्यधिकं क्रोधं कुर्वन्ति। क्रोधावेशे अविचार्य यत् किञ्चिदपि कुर्वन्ति। किं जानन्ति भवन्तः यत् यदा वयं क्रोधं कुर्मः तदा अन्येषां हानिः तादृशी न भवति यादृशी अस्माकम्। यथा अग्नितीलिका किञ्चित् प्रज्वालनात् प्राक् स्वयं प्रज्वालिता भूत्वा विनश्यति तथैव वयम् अपि क्रोधेन विनाशं प्रति गच्छामः। उक्तञ्च गीतायाम्–

क्रोधात् भवति सम्मोहः संमोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति।।

अतः कल्याणकांक्षिभिः क्रोधस्य नियन्त्रणम् अवश्यमेव कर्त्तव्यम्। क्रोधनियन्त्रणे ध्यानयोगः, प्राणायामस्य अभ्यासः, कानिचित् योगासनानि च अत्यधिकं सहायकानि भवन्ति।

## व्याकरणबिन्दवः

### पदपरिचयः

| | | | |
|---|---|---|---|
| तपसाम् | – 'तपस्' शब्दः | षष्ठीविभक्तिः | बहुवचनम् |
| वत्से | – 'वत्सा' शब्दः | सम्बोधने | एकवचनम् |
| विमृशति | – वि + √मृश् + लट् | प्र0पु0 | एकवचनम् |
| अनुयास्यति | – अनु + √या लृट् | प्र0पु0 | एकवचनम् |
| विनोदयिष्यति | – वि + √नुद् लृट् | प्र0पु0 | एकवचनम् |

### प्रकृति–प्रत्ययप्रयोगः

प्रवृत्तः – प्र + वृत् + क्त, पु0 प्र0 विभक्तिः, एकवचनम्

उक्त्वा – वच् + क्त्वा

**सन्धिच्छेदः**

| | | | | | |
|---|---|---|---|---|---|
| साधुसेवितः | + | अयम् | = | साधुसेवितोऽयम् | (विसर्गसन्धिः) |
| अतिरोषणः | + | चक्षुष्मानन्धः | = | अतिरोषणश्चक्षुष्मानन्धः | (विसर्गसन्धिः) |
| इति | + | उक्त्वा | = | इत्युक्त्वा | (यण्सन्धिः) |
| पुनः | + | आह | = | पुनराह | (विसर्गसन्धिः–रत्वम्) |
| दृष्टिः | + | इव | = | दृष्टिरिव | (विसर्गसन्धिः–रत्वम्) |

**समासाः**

| | | | |
|---|---|---|---|
| कोपकलुषिता | – | कोपेन कलुषिता | (तृतीया तत्पुरुषः) |
| रोषदोषनिषद्यं | – | रोषः एव दोषः | (कर्मधारध समासः) |
| | | रोषदोषेण निषद्यः | (तृतीया तत्पुरुषः) |
| अनागसाम् | – | न आगसा अनागसा ताम् | (नञ्तत्पुरुष) |

**विसर्गसन्धिः**

विसर्गस्य कृते संस्कृते विसर्जनीयशब्दस्य प्रयोगः भवति।

**विसर्जनीयस्य र्**

| | | | |
|---|---|---|---|
| मुनेरत्रेः | – | मुनेः | + अत्रेः |
| अभूमिरेषा | – | अभूमिः | + एषा |
| पयःपावकयोरिव | – | पयः | + पावकयोः + इव |
| दृष्टिरिव | – | दृष्टिः | + इव |
| बुद्धिर्न | – | बुद्धिः | + न |
| पुनराह | – | पुनः | + आह |

**विसर्जनीयस्य स्**

| | | | |
|---|---|---|---|
| अत्रेस्तनयः | – | अत्रेः | + तनयः |
| अधस्तात् | – | अधः | + तात् |
| कृथास्तपसः | – | कृथाः | + तपसः |

**विसर्जनीयस्य उ**

सतो वा – सतः + वा

तपो गलति – तपः + गलति

**विसर्जनीयस्य श् (ः – स् – श्)**

अतिरोषणश्चक्षुष्मान् – अतिरोषणः + चक्षुष्मान्

### विसर्जनीयस्य ष् (ः – स् – ष्)

चक्षुष्मान् – चक्षुः + मान्

### शब्दरूपाणि

दुर्वासस् – अयं शब्दः सकारान्तः पुल्लिंगः। अस्य रूपाणि अधः दीयन्ते

| | एकवचनम् | द्विवचनम् | बहुवचनम |
|---|---|---|---|
| प्रथमा | दुर्वासाः | दुर्वाससौ | दुर्वाससः |
| द्वितीया | दुर्वाससम् | दुर्वाससौ | दुवाससः |
| तृतीया | दुर्वाससा | दुर्वासोभ्याम् | दुर्वासोभिः |
| चतुर्थी | दुर्वाससे | दुर्वासोभ्याम् | दुर्वासोभ्यः |
| पञ्चमी | दुर्वाससः | दुर्वासोभ्याम् | दुर्वासोभ्यः |
| षष्ठी | दुर्वाससः | दुर्वाससोः | दुर्वासाम् |
| सप्तमी | दुर्वाससि | दुर्वाससोः | दुर्वासस्सु |
| सम्बोधनम् | हे दुर्वासः | हे दुर्वाससो | हे दुर्वाससः |

चन्द्रमस्, महातेजस्, प्राचेतस्, शब्दानाम् अपि रूपाणि इत्थम् एव भवन्ति।

शतृप्रत्ययान्तस्त्रीलिंगशब्दानां रूपाणि यथा हस् + शतृ = हसन्ती, लिख् + शतृ = लिखन्ती) ईकारान्त नदी शब्दवत् भवन्ति।

### धातुरूपाणि

#### दृश् (पश्य)

| | लट् लकारः | | | लोट् लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | पश्यति | पश्यतः | पश्यन्ति | पश्यतु | पश्यताम् | पश्यन्तु |
| **मध्यमपुरुषः** | पश्यसि | पश्यथः | पश्यथ | पश्य | पश्यतम् | पश्यत |
| **उत्तमपुरुषः** | पश्यामि | पश्यावः | पश्यामः | पश्यानि | पश्याव | पश्याम |

| | लङ् लकारः | | | लृट् लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति | अपश्यत् | अपश्यताम् | अपश्यन् |
| **मध्यमपुरुषः** | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ | अपश्यः | अपश्यतम् | अपश्यत |
| **उत्तमपुरुषः** | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः | अपश्यम् | अपश्याव | अपश्याम |

**विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | पश्येत् | पश्येताम् | पश्येयुः |
| **मध्यमपुरुषः** | पश्येः | पश्येतम् | पश्येत |
| **उत्तमपुरुषः** | पश्येयम् | पश्येव | पश्येम। |



टिप्पणी

### तृतीयांशसारः

पितामहः सरस्वतीं शप्तां दृष्ट्वा शापकलकलं दूरीकृत्य गंभीरस्वरेण अकथयत् दुर्वासमुनेः मार्गः उचितः नास्ति। यः जितेन्द्रियः न भवति तस्य विवेकः नश्यति। मुनिना तु क्षमा कर्त्तव्या यतोहि क्षमा हि मूल सर्वतपसाम्। ऋषेः दुर्वाससः दृष्टिः तु परदोषदर्शनदक्षा अस्ति। क्रोधेन अभिभूता बुद्धिः आत्मनः दोषं न पश्यति। अतिरोषेण जनः अन्धः भवति। क्रोधे विद्यमाने सति किमर्थं सः निरपराधसरस्वतीं शापेन निगृहीतवान्। तदनन्तरं ब्रह्मा सरस्वतीम् अकथयत् यत् सा विषादं न कुर्यात्। सावित्री तया सह मर्त्यलोकं गमिष्यति। पुत्रस्य मुखदर्शनपर्यन्तम् शापस्य अवधिः भविष्यति।

दुर्वासा ने सरस्वती को शाप दे दिया, यह देखकर प्रजापति ने शाप के कारण उत्पन्न कोलाहल को शान्त कर दुर्वासा से कहा कि जो मार्ग उन्होंने अपनाया है वह उचित नहीं है। जो जितेन्द्रिय नहीं होता उसका विवेक नष्ट हो जाता है। मुनि को तो क्षमा करनी चाहिए क्योंकि क्षमा ही सब तपस्याओं का मूल है। दुर्वासा की दृष्टि तो दूसरों के दोष देखने में निपुण है। क्रोध से अभिभूत दृष्टि अपने दोषों को नहीं देख पाती। अतिक्रोध से व्यक्ति अन्धा हो जाता है। दुर्वासा को क्रोध से भरे अपने हृदय पर नियन्त्रण रखना चाहिए था। इसके बाद प्रजापति ने सरस्वती से कहा कि वह चिन्तित न हो। उसके साथ सावित्री मर्त्यलोक जाएगी और शाप की अविध पुत्र का मुखकमल देखने तक है।

## पाठगतप्रश्नाः 19.3

1. 'क' स्तम्भस्य पदानि 'ख' स्तम्भे पदैः सह मेलयत

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (क) अवलोकयन् | (i) निपुणा |
| (ख) पन्थाः | (ii) आदिः |
| (ग) उवाच | (iii) पश्यन् |
| (घ) दक्षा | (iv) पुत्रः |
| (ङ) आरम्भः | (v) मार्गः |
| (च) आत्मजः | (vi) अकथयत् |

2. पूर्णवाक्येन उत्तरत
   (क) सर्वतपसां मूलं का अस्ति?
   (ख) कोपकलुषिता मतिः किं न विमृशति?
   (ग) सरस्वतीं का अनुयास्यति?
   (घ) शापस्य अवधिः का भविष्यति?
   (ङ) दुर्वासाः काम् निगृहीतवान्?





3. विशेषणेन सह विशेष्यं मेलयत

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| (क) शप्तुम् | धिया |
| (ख) विशुद्धया | सरस्वति |
| (ग) इयम् | मतिः |
| (घ) कोपकलुषिता | सरस्वतीम् |
| (ङ) वत्से | वृत्तिः |



## 19.4 किम् अधिगतम्

- प्रजापतेः सभायां देवाः विद्याविषये चर्चां कुर्वन्ति स्म।
- वेदानां पठने स्वराणां शुद्धः प्रयोगः कर्तव्यः।
- दुर्वाससः मुनेः स्वभावः क्रोधयुक्तः अस्ति।
- दुर्वाससः शापात् सरस्वती धरणीतले आगता।
- परस्मैपदिधातुभिः सह शतृप्रत्ययस्य प्रयोगः भवति। आत्मनेपदिधातुभिः सह शानच्प्रत्ययस्य प्रयोगः भवति।
- विसर्गस्थाने रत्वं, सत्वं, शत्वं, उत्वं च भवति।



## 19.5 योग्यताविस्तारः

दुर्वाससा शप्ता सरस्वती सावित्र्या सह पृथ्वीतलम् आगच्छत्। सा शोणनद्याः तीरे अवसत्। ऋषेः च्यवनस्य सुतेन दधीचिना सह उषित्वा पुत्रवती अभवत्। पुत्राय वेदानां, शास्त्राणां, कलानां, सर्वासां विद्यानां च ज्ञानं दत्वा च्यवनस्य ऋषेः दीधीचेः च आज्ञया सरस्वती सावित्र्या सह ब्रह्मलोकं गतवती। सारस्वतः स्वपितृव्यपुत्रेण वत्सेन सह वृद्धिं गतः। यौवनं प्राप्य सारस्वतः स्वमित्राय वत्साय सर्वाः विद्याः उक्त्वा स्वपितुः दधीचेः तपोवने तपः आचरितुम् अगच्छत्।

वत्सेन वंशः प्राचलत्। तस्य गोत्रस्य नाम वात्स्यायन गोत्रम् इत्यभवत्। वात्स्यायनगोत्रे संस्कृतभाषायाः सुप्रसिद्धः गद्यलेखकः बाणभट्टः जन्म अलभत। तस्य पितुः चित्रभानुः तथा मातुः नाम राजदेवी इति आसीत्।

प्रस्तुतः पाठः बाणभट्टसय हर्षचरितम् इति ग्रंथात् गृहीतः। अस्मिन् ग्रन्थे बाणभट्टेन आत्मकथा अपि लिखिता। अयम् एकमात्रं ग्रन्थः यत्र केनापि स्वजीवनकथा लिखिता।

**क्रोधः**– अमर्षशून्यस्य जनस्य जन्तुना न जातहार्देन विद्विषादरः।
प्रतिश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान् निशितो इवेषवः। (शिशु व महा.)

**देव्यः**– भारतीय संस्कृतौ तिस्रः प्रमुखाः देव्याः स्मर्यन्ते। सरस्वती– इयं विद्यायाः देवी अस्ति। इयं श्वेतवस्त्रावृता तिष्ठति। अस्याः वाहनं हंसः अस्ति यः श्वेतवर्णः भवति। अस्याः हस्ते स्फटिकमाला भवति। अन्यस्मिन् हस्ते पुस्तकं तिष्ठति।

**दुर्गा**– इयं शक्तेः देवी। इयं पार्वती इत्यपि उच्यते। चामुण्डा, कात्यायनी, कालिका इत्यादीनि दुर्गायाः अन्यानि नामानि सन्ति।

**लक्ष्मीः**– इयं धनस्य देवी। इयं रमा, श्रीः इत्यपि कथ्यते। इयं देवैः असुरैः च समुद्रे मन्थनकाले चतुर्दशरत्नैः सह लब्धा। इयं विष्णोः नारायणस्य पत्नी अस्ति। अस्याः वाहनम् उलूकः अस्ति।

**सावित्री**– सावित्री ब्रह्मणः पत्नी। सावित्री गायत्री मन्त्रस्य, अधिष्ठात्री देवी अस्ति।

**वेदाः**– वेदाः ज्ञानमयाः ग्रन्थाः सन्ति। वेदाः चत्वारः सन्ति ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदः। ऋग्वेदे देवस्तुतयः वर्तन्ते। यजुर्वेदे यज्ञानां सम्बन्धे मन्त्राः सन्ति। सामवेदे गानानि सन्ति। अथर्ववेदे स्वास्थ्यस्य, समाजस्य लोकव्यवहारस्य मन्त्राः सन्ति।

## 19.6 पाठान्तप्रश्नाः

1. कः कम् कथयति?

| कथनानि | कः? | कम्? |
|---|---|---|
| (क) आः पापकारिणि! दुर्विदग्धे माम् उपहससि। | ........ | ......... |
| (ख) ततो मर्षय भगवन्! अभूमिरेषा शापस्य। | ........ | ......... |
| (ग) आः दुरात्मन्, क्रोधोपहत, कथं त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् अभिलषसि? | ........ | ......... |
| (घ) सखि! संहर रोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः। | ........ | ......... |
| (ङ) उपाध्याय! स्खलितमेकं क्षमस्व। | ........ | ......... |

2. सरस्वत्याः धरणीतले अवतरणस्य कथायाः सारं पञ्च वाक्येषु लिखत।
3. मुनेः दुर्वाससः चरित्रस्य चतस्रः विशेषताः लिखत।

4. अधोलिखितानां शब्दानां प्रत्येकं द्वौ समानार्थकौ शब्दौ शब्दमञ्जूषायाः लिखत।

| **शब्दाः** | **समानार्थकौ शब्दौ** | |
|---|---|---|
| (क) परमेष्ठी | ................ | .................. |
| (ख) वारि | ................ | .................. |
| (ग) चक्षुः | ................ | .................. |
| (घ) सरस्वती | ................ | .................. |
| (ङ) वत्से | ................ | .................. |

| **शब्द—मञ्जूषा** |
|---|
| जलम्, अक्षि, भारती, प्रजापतिः, नेत्रम्, पुत्रि, उदकम्, ब्रह्मा, शारदा, सुते |

5. दशदिशां नामानि लिखत।
6. 'क्रोधः' इत्यस्मिन् विषये पञ्चवाक्यानि लिखत।
7. 'दुर्वासस्' शब्दस्य इव चन्द्रमस् शब्दस्य रूपाणि लिखत।
8. निर्दिष्ट धातुरूपैः वाक्यानि पूरयत
   (क) त्वम् गजं ........................ (दृश्—लट्)
   (ख) ते क्रिकेटम् ................... (दृश्—लोट्)
   (ग) उमा ह्यः नाटकम् ................... (दृश्—लङ्)
   (घ) यूयम् मेलकं ................... (दृश्—विधिलिङ्)
   (ङ) वयम् श्वः उद्यानं ................... (दृश्—लृट्)

## 19.7 उत्तराणि

**19.3 बोधप्रश्नाः**

1. (क) ii, (ख) vi, (ग) i, (घ) iii, (ङ) iv, (च) v
2. (क) प्रारभत, (ख) भविष्यति, (ग) पश्यति, (घ) गाः, (ङ) जग्राह
3. (क) कमलासने, (ख) विस्वरम्, (ग) सावित्री, (घ) सर्वतपसाम्, (ङ) कोपकलुषिता

**पाठगतप्रश्नाः**

**19.1** 1. (क) देवैः, (ख) अत्रेः, (ग) दुर्वासा, (घ) विस्वरमकरोत्, (ङ) सरस्वती, (च) शापजलम्।

2. (क) हसन्तीम्, (ख) उपवीजयन्ती, (ग) आबध्नन्, (घ) धावन्ति, (ङ) समाचरन्, (च) शिक्षयन्ती

3. (क) ऋचः, (ख) सामानि, (ग) विस्वरम्, (घ) शापजलम्, (ङ) यजूंषि (च) पितामहम्

**19.2** 1. (क) का (ख) कम् (ग) कैः (घ) कुत्र (ङ) का

2. (क) क्रोधोपहतः (ख) अभूमिः + एषा (ग) इति + अनुनाथ्यमानः + अपि (घ) बद्धः + अ×जलिपुटैः (ङ) इति + उक्त्वा

3. (क) कलह् धातुः (ख) अनु उपसर्गः नाथ् धातुः (ग) नि उपसर्गः + वृ धातुः (घ) वर्तधातुः (ङ) कम्प् धातुः

**19.3** 1. (क) iii (ख) v (ग) vi (घ) i (ङ) ii (च) iv

2. (क) सर्व तपसां मूलं क्षमा अस्ति।

(ख) कोपकलुषिता मतिः कर्त्तव्यम अकर्त्तव्यम् वा न विमृशति

(ग) सरस्वतीं सावित्री अनुयास्यति।

(घ) शापस्य अवधिः पुत्रमुखावलोकनं भविष्यति।

(ङ) दुर्वासा सरस्वतीं निगृहीतवान्।

3. (क) शप्तुम् सरस्वतीं (ख) विशुद्धया धिया (ग) इयम् वृत्तिः (घ) कोपकलुषिता मतिः (ङ) वत्से सरस्वति

**19.6 पाठान्तप्रश्नाः**

1. (क) दुर्वासा – सरस्वतीम् (ख) देवाः – दुर्वाससम् (ग) सावित्री – दुर्वाससम् (घ) सरस्वती – सावित्रीम् (ङ) शिष्याः – दुर्वाससम्
2. स्वयं कुरुत।
3. स्वयं कुरुत।
4. (क) प्रजापतिः ब्रह्मा
   (ख) उदकम्, जलम्
   (ग) अक्षि, नेत्रम्
   (घ) शारदा, भारती
   (ङ) पुत्रि, सुते
5. 1. पूर्वा, 2. आग्नेयी, 3. दक्षिणा, 4. नैऋती, 5, पश्चिमा, 6. वायवी, 7. उत्तरा, 8. ऐशानी, 9. ऊर्ध्वम्, 10. अधः।
6. स्वयं कुरुत।
7. स्वयं कुरुत।
8. (क) पश्यसि (ख) पश्यन्तु (ग) अपश्यत्
   (घ) पश्येत (ङ) द्रक्ष्यामः